# ॥ गायत्रीहृदयम् २ ॥

.. Gayatri Hridayam 2 ..

sanskritdocuments.org

July 25, 2016

# Document Information

Text title : gaayatrii hRRidayam
File name : gAyatrIhRidaya2.itx
Category : hRidaya
Location : doc_devii
Language : Sanskrit
Subject : philosophy/hinduism/religion
Transliterated by : Sunder Hattangadi sunderh at hotmail.com
Proofread by : Sunder Hattangadi sunderh at hotmail.com
Latest update : September 2, 2007, March 16, 2014
Send corrections to : Sanskrit@cheerful.com
Site access : http://sanskritdocuments.org

# ॥ गायत्रीहृदयम् २ ॥

। अथ गायत्री हृदयम् ।

ॐ इत्येकाक्षरं ब्रह्म, अग्निर्देवता, ब्रह्म इत्यार्षम्,
गायत्रं छन्दं, परमात्मम् स्वरूपं, सायुज्यं विनियोगम् ।
आयातु वरदा देवी अक्षर ब्रह्म सम्मितम् ।
गायत्री छन्दसां माता इदं ब्रह्म जुहस्व मे ॥

यदन्नात्कुरुते पापं तदन्नत्प्रतिमुच्यते ।
यद्रात्र्यात्कुरुते पापं तद्रात्र्यात्प्रतिमुच्यते ॥

सर्व वर्णे महादेवि सन्ध्या विद्ये सरस्वति ।
अजरे अमरे देवि सर्व देवि नमोऽस्तुते ॥

ओजोसि सहोसि बलमसि भ्राजोसि देवानां धाम नामासि विश्वमसि ।
विश्वायुः सर्वमसि सर्वायुरभि भूरोम् ॥

गायत्रीं आवाहयामि सावित्रीं आवाहयामि सरस्वतीं आवाहयामि ।
छन्दर्शिन आवाहयामि श्रियं आवाहयामि बलं आवाहयामि ॥

गायत्र्या गायत्री छन्दो विश्वामित्र ऋषिः सविता देवता ।
अग्निर्मुखं ब्रह्मा शिरो विष्णुर्हृदयं रुद्रःशिखा ।
पृथिवी योनिः प्राणापान व्यानोदान समान सप्राण
श्वेतवर्ण सांख्यायन्यास गोत्र गायत्री चतुर्विंशत्यक्षरा
त्रिपाद् षट् कुक्षिः पञ्चशीर्षोपनयने विनियोगः ॥

। इति गायत्री हृदयम् ।

Gayatri - Sant Keshvadas; Vishva Shanti Ashrma
Encoded and proofread by Sunder Hattangadi sunderh@hotmail.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted for promotion of any website or individuals or for commercial purpose without permission.

Please help to maintain respect for volunteer spirit.

.. Gayatri Hridayam 2 ..
was typeset on July 25, 2016

Please send corrections to *sanskrit@cheerful.com*